त्रि० । कज्जलशून्ये त्रि० । "नेत्रे दूरमनञ्जने पुलकितेति" सा०द० ।

**अनडुज्जिह्वा** स्त्री अनडुहोजिह्वेव । गोजिह्वायाम् (अनन्तमूल) । तस्या गोजिह्वाकृतिपत्नत्वात्तथात्वम् ।

**अनडुह्** पु०अनः शकटं वहतीति नि०। (एड़) इति प्रसिद्धे गवि । स्त्रियां गवि ङीपि अनडुही, अनड्वाहीति च । ऋश्यादि० क । अनुडुत्कः अनडुदासन्नदेशादौ त्रि० । ऋषिभेदे । तद्गोत्रापत्ये गर्गा० यञ् । आनुडुह्यः तदपत्ये पु०स्त्री ।

**अनणु** पु० न अणुः । स्थूलधान्ये "अनणुषु दशमांशोऽणुष्वष्टकादशांशः" लीला०। अणुभिन्ने स्थूले त्रि०स्त्रियां ङीप् ।

**अनतिक्रम** न० न०त० । अतिक्रमाभावे । [ङ्घनीये ।

**अनतिक्रमणीय** त्रि० न०त० । अतिक्रमणीयभिन्ने अनुल्ल-

**अनतिद्भुत** त्रि० सर्व्वाणि अतिक्रम्य न भवति अति—भू—डुतच् न०त०ष्टु० । सर्वातिक्रमेणाभूते यथार्थभूते । "अद्धा त इन्द्र ! गिर्वणः क्रियन्ते अनतिद्भुता" इति ऋ० ८,६१,२, अनतिद्भुता सर्वानतिक्रम्य न भवन्ति इन्द्रगुणव्यापकानि यथार्थभूतानीति" भा० ।

**अनतिप्रश्न्य** त्रि० अतिप्रश्नमर्हति यत् न०त० । अतिप्रश्नानर्हे वस्तुनि । "सहोवाच गार्गि ! मातिप्राक्षीः मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसीति" वृ०उ०

**अनतिरिक्त** त्रि० न० । अधिके । "न्यायोक्ते स्वानधिकरणवृत्तिभिन्ने च "अनतिरिक्तवृत्तित्वमवच्छेदकत्वमिति"गदा०।

**अनतिविलम्बिता** स्त्री न अतिविलम्बिता अभावार्थे न०त० । अतिविलम्बाभावे वाग्गुणभेदे च । वाग्गुणास्च हेमचन्द्रे दर्शिताः यथा "संस्कारवत्त्वमौदार्य्यमुपचारपरीतता । मेघगाम्भीर्य्यनिर्घोषप्रतिनादविधायिता दक्षिणत्वमुपनीतरागत्वं च महार्थता । अव्याहतत्वं श्लिष्टत्वं संशयानामसम्भवः । निराकृतान्योत्तरत्वं हृदयङ्गमिताऽपि च । मिथः साकाङ्क्षता प्रस्तावौचित्यं तत्त्वनिष्ठता । अप्रकीर्णप्रसृतत्वमसंश्लाघ्यान्यनिन्दिता । आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता । अमर्मवेधितौदार्य्यं धर्म्मार्थप्रतिबद्धता । कारकाद्यविपर्य्यासोविभ्रमादिवियुक्तता चित्रकृत्त्वमद्भुतत्वं तथानतिविलम्बिता अनेकजातिवैचित्र्यमारोपितविशेषता । सत्वप्रधानता वर्णपदवाक्यविविक्तता । अव्युच्छित्तिरखेदित्वम्पञ्चत्रिंशच्च वाग्गुणाः" इति ।

**अनद्धा** अव्य० न अद्धा । अनिश्चये "अनद्धा वैतद्यदिमाल्लोकानतीति" वेदः । नह—क्त न०त० । अपरिबद्धे त्रि० ।

**अनद्धापुरुष** न अद्धा स्वकार्य्ये निश्चयो यस्य तादृशः पुरुषः । देवपितृकार्य्यविमुखे । "अनद्धापुरुषमीक्षते" इति का० १६,२,१२, "अनद्धापुरुषं देवपितृकार्य्ये विमुखमध्वर्युमिति" वेददीपः ।

**अनद्य** पु० न अद्यं भक्ष्यम् अप्राशस्त्ये न०त० । गौरसर्षपे राजनिघ० । भक्ष्यभिन्ने त्रि० ।

**अनद्यतन** पु० न अद्यतनः । अद्यतनभिन्ने भूते भविष्यति च काले "अनद्यतने लङि"ति "अनद्यतने लुङिति" च पा० । अनद्यतने भूते लङः अपचत्, अनद्यतने भविष्यति लुट् पक्तेति "परोक्षानद्यतने लिडिति" पा० पपाच । तत्कालवृत्तौ त्रि० । अद्यतनश्च "अतीतायाराविः पश्चार्द्धेन, आगामिन्याः रात्रेः पूर्व्वार्द्धेन सहितोदिवसोऽद्यतन" इति सि०कौ० तद्भिन्नः कालः ।

**अनधिकार** पु० न अधिकारः अभावार्थे न०त० । अधिकाराभावे । ब० । अधिकारशून्ये ।

**अनधिकारचर्चा** स्त्री अनधिकारस्य चर्च्चा चिन्ता । यत्र यस्याधिकारो नास्ति तस्य तद्विषये चिन्तायाम् ।

**अनधिकारिन्** त्रि० न अधिकारी । अधिकारिभिन्ने ।

**अनधिकृत** त्रि० न अधिकृतः । अधिकृतभिन्ने ।

**अनधिगत** त्रि० न०त०। गतभिन्ने, प्राप्तभिन्ने, ज्ञातभिन्ने च अनधिगताबाधितार्थज्ञानत्वेन प्रमाणत्वमिति वे०प०।

**अनधिष्ठित** त्रि० न अधिष्ठितः । अधिष्ठितभिन्ने ।

**अनधीन** त्रि० न अधीनः परस्य । स्वाधीने । संज्ञायाम् कन् । कौटतक्षे । स हि कुर्व्यां वसन् न कस्यचित् अधीनः

**अनध्यक्ष** न० अध्यक्षम् अभावे न०त०। प्रत्यक्षाभावे "मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्" इति भाषा० द्रव्यप्रत्यक्षं प्रति आश्रयमहत्त्वस्य कारणत्वेन मनसश्च "अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते इत्युक्तेः अणुत्वेन ज्ञानादिप्रकारकं अहंजानामीत्याद्याकारं ज्ञानं प्रत्यक्षं न स्यात् ज्ञानाश्रयत्वेन अभिमतस्य मनसो महत्त्वाभावादिति तदाशयः । ब० । अध्यक्षरहिते त्रि० ।

**अनध्याय** पु० अध्यायोऽध्ययनमभावार्थे न०त० । अध्ययनाभावे । न अधीयतेऽस्मिन् काले इति अधिकरणे घञ् । अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयादौ स्मृतिसूक्तानध्यायकाले "अष्टकासु च संक्रान्तौ शयने बोधने हरेः । अनध्यायं प्रकुर्व्वीतेत्याद्युक्ते काले, "निर्घाते भूमिचलने" इत्याद्याकालिकानध्यायकाले च । अनध्यायकालास्च स्मृतौ